# देवदर्शनाय योग्यता

## च्वि प्रयोगः

एकदा मण्डलराज्यस्य राजा आदित्यनाथः राज्यस्य व्यवस्थां निरीक्षितुं कस्मिंश्चित् ग्रामे भ्रमणं कुर्वन् तेजस्विनमेकं सन्यासिनमपश्यत् | बहवः जनाः तं वन्दमानाः आसन् | इदं दृष्ट्वा, तत्र उपस्थितान् जनान् राजा पृष्टवान् "कोऽयं तेजस्वी पुरुषः ? किमर्थं यूयं सर्वे तं नमस्कुर्वन्ति ?" इति | जनैः तस्य साधोः विषये राज्ञे सर्वं स्पष्टीकृत्य कथितं यत् एतेन साधुना पूर्वं कस्यापि वृद्धस्य जर्जरीभूतं शरीरं तरुणीकृतम् इति | ते राज्ञे कथितवन्तः यत् "सः साधुः देवस्य प्रत्यक्षं दर्शनं प्राप्तवान् तथा नैकाः सिद्धीः अपि प्राप्तवान् अस्ति" इति |

विस्मयीभूतः राजा झटिति सङ्कल्पं कृतवान् | देवदर्शनेन सिद्धिप्राप्तिः भवति चेत् मया अपि देवदर्शनं करणीयम् " इति |

अग्रिमे दिने, राजा तस्य राजसभायां घोषणां कृतवान् " ईश्वरः कुत्र अस्ति इति यः दर्शयेत् तस्मै योग्यम् उपायनं दास्यामि " इति | किन्तु, कोऽपि एतस्य उत्तरं दातुं न समर्थीभूतः |तदा राजा मन्त्रिणम् उक्तवान् "एतस्य प्रश्नस्य उत्तरदायित्वम् इदानीं भवतः एव अस्ति | भवता मासाभ्यन्तरम् उत्तरं दातव्यं नो चेत् मया भवतः शिरच्छेदः कारयिष्यते " इति | राज्ञः वचनं श्रुत्वा मन्त्री कातरीभूतः |

एकः सप्ताहः अतीतः | राज्ञे प्रश्नस्य योग्यम् उत्तरं कथं दातव्यमिति महत्या चिन्तया ग्रस्तः मन्त्री एकदा मार्गेण गच्छन् आसीत् | तदा साधोः सेवकः तस्य अभिमुखम् आगत्य नमस्कृत्य चिन्तायाः कारणं पृष्टवान् । " स्वामिन् चिन्तितः असि भवान् इति मन्ये | किं कारणं चिन्तायाः?" इति | मन्त्री सेवकं राज्ञः प्रश्नं श्रावयित्वा चिन्तायाः कारणं स्पष्टीकृतवान् | " अहमेतस्य प्रश्नस्य उत्तरं न जानामि एव | अतः प्राणरक्षणार्थं किं कर्तव्यम् इति विचारेण बहु चिन्तितः अस्मि" | तदा सेवकः गम्भीरतया अवदत् " मन्त्रिवर्य, अलं चिन्तया | भवतः चिन्तायाः समाधानम् अहं करिष्यामि | भवान् मां राज्ञः समीपं नयतु" इति | साधोः सेवकस्य विश्वासपूर्णं वचनं श्रुत्वा मन्त्रिणः मनसि धैर्यम् अङ्कुरीभूतम् | सः सेवकम् अग्रिमे दिने एव राजसभां नीत्वा "एषः साधोः सेवकः भवतः प्रश्नस्य उत्तरं दास्यति" इति राजानम् अवदत् | "साधारणः सेवकः एषः | मम प्रश्नस्य उत्तरं कथं दद्यात् " इति संदेहं राजा प्रकटीकृतवान् | सः सेवकः तु किमपि प्रतिवचनम् अवदन् चषकमितं क्षीरं च एकां शलाकां च प्रार्थयत् | क्षीरपात्रे आनीते शलाकया क्षीरपात्रे क्षीरस्य आलोडनं कुर्वन् तत्रैव उपाविशत् |

किञ्चित्कालानन्तरं राजा अपृच्छत् "किमिदं क्रियते त्वया ?" साधोः सेवकः अवदत् "हे राजन् ! क्षीरे नवनीतांशः अस्ति इति श्रूयते | अतः तस्य एव अन्वेषणं कुर्वन् अस्मि " इति | राजा सम्भ्रमीभूय अवदत्, "किन्तु नवनीतं तु दध्नः मथनात् प्राप्यते | अतः आदौ क्षीरं दधि करणीयं, तदनन्तरं मथनं करणीयम् | तदा एव नवनीतं लभ्येत " इति |

साधोः सेवकः अह्नाय अवदत् " महाराज , देवदर्शनमपि एवमेव | देवः तु सर्वत्र अस्ति किन्तु मनसि विचाराणां मथनम् आवश्यकम् | भक्त्या विना, त्यागतपस्यादिभिः विना भगवान् कथं दृश्यते? देवस्य दर्शनार्थं काचित् योग्यता सम्पादनीया खलु " इति |

एतद् उत्तरं श्रुत्वा सन्तुष्टीभूय राजा तस्मै सहस्रं सुवर्णनाणकानि उपायनरूपेण दत्तवान् |

मन्त्री अपि अतीव मुदितः सन् स्वगृहं निर्गतः |

Sunetra Nagarakatti